| अथ महापातकानि। | प्रायश्चित्तानि। | तदशक्तौ धेनुदानम्। | तदशक्तौ चूर्णीदानम्। | दक्षिणा। |
|---|---|---|---|---|
| महापातकिनां लघुतरसंसर्गो यथा। एकशय्यासनयानादिः। ततो लघुतर आलापस्पर्शनिःश्वासादिः। | एभिश्च त्रिभिर्लघुतरसंसर्गैरेको लघुसंसर्गः। | | | |
| | ज्ञानतस्त्रिभिर्लघुसंसर्गैर्वत्सरेण साम्यम्। तेनाष्टादशवार्षिकव्रतम्। | २७० धेनवः। | ८१० कार्षापणाः। तल्लभ्यस्वर्णादि वा। | १५० गावः। अशक्तौ १५० कार्षापणाः। |
| | अज्ञानतो वत्सरद्वयेन। | तथा। | तथा। | तथा। |
| | ज्ञानत एकैकशो वत्सरत्रयेण। | तथा। | तथा। | तथा। |
| | अज्ञानाद्वत्सरषट्केन। | तथा। | तथा। | तथा। |
| | संलापादीनां त्रयाणां एकैकयानादिसमानत्वात् ज्ञानतो वत्सरत्रयेण पातः। | तथा। | तथा। | तथा। |
| | संलापादीनां त्रयाणां एकैकयानादिसमानत्वादज्ञानाद्वर्षषट्केन पातः। तेनाष्टादशवार्षिकव्रतम्। | २७० धेनवः। | ८१० कार्षापणाः। तल्लभ्यस्वर्णादि वा। | १५० गावः। अशक्तौ १५० कार्षापणाः। |
| | ज्ञानादेकैकशो वत्सरनवकेन। | तथा। | तथा। | तथा। |
| | अज्ञानादेकैकशोऽष्टादशवत्सरैः पातः।*। नवविधपापान्वितानां मध्यात् येन पापीयसा यः संसृष्टः स तस्य व्रतं पादहीनं कुर्य्यात्॥ एतच्च प्रथमसंसर्गिणाम्। द्वितीयसंसर्गिणां द्विपादहीनम्। तृतीयसंसर्गिणां त्रिपादहीनं सर्व्वत्र ज्ञेयम् ॥ * ॥ संसर्गाणामुक्तकालन्यूनाधिक्ये भागहारेण प्रायश्चित्तन्यूनाधिक्यं ज्ञेयम् ॥ * ॥ रघुनन्दनभट्टाचार्य्यमते कलौ लघुसंसर्गेषु प्रतिग्रहादिषु पातित्याभावात् तत्प्रायश्चित्ताभावः। | तथा। | तथा। | तथा। |
| पतितोत्पन्नत्वमपि महापातकिसंसर्गविशेषः। | यस्य पतितस्य यत् प्रायश्चित्तं तस्य पातित्यदशायां जातस्य पुत्रस्य तत् तृतीयभागप्रायश्चित्तम्। तदानीं तज्जातायाः कन्यायाः पतितोत्पन्नपुत्रप्रायश्चित्ततृतीयभागप्रायश्चित्तम्। | | | |

| अथानुपातकानि। | प्रायश्चित्तानि। | तदशक्तौ। धेनुदानम्। | तदशक्तौ। चूर्णीदानम्। | दक्षिणा। |
|---|---|---|---|---|
| समुत्कर्षे अनृतम्। तत्तु समुत्कर्षनिमित्तं वाचा क्रियया वा अन्यथा प्रतिपादनं यथा शूद्रस्य ब्राह्मणोऽहमिति वचनं यज्ञोपवीतधारणञ्च। अथवा परस्य सम्यग्जातिविद्योत्कर्षे सति नायं ब्राह्मणो न च किञ्चिदयं जानीते इत्यनृतवचनम् ।१। राजगामिपैशुनम्। तत्तु राजनि निर्द्दोषस्य दोषख्यापनम् ।२। गुरोरलीकनिर्बन्धः। स तु गुरोर्जन्मदातुर्मृषादोषाभियोगः।३। | द्वादशवार्षिकव्रतम्। एतच्च ज्ञानात्यन्ताभ्यासतः॥ * ॥ एतन्मध्याद्यदुपपातके दृश्यते तदज्ञानादिना लघुविषयश्चेत्यादिव्यवस्थेयम्॥ * ॥ यत्र वशिष्ठवचनं ब्रह्मोज्झः कृच्छ्रं द्वादशरात्रं चरित्वा पुनरुपयुञ्जीत वेदमाचार्य्यात्। विष्णुः। समुत्कर्षानृते गुरोश्चालीकनिर्बन्धे तदाक्षारणे च मासं पयसा वर्त्तेत। आक्षारणं परदारगमनाभिशापः। वशिष्ठः। गुरोश्चालीकनिर्बन्धे सचेलस्नातो गुरुं प्रसादयेत् प्रसादात् पूतो भवति। एतानि प्रमादादिकृते बोध्यानि। | १८० धेनवः। | ५४० कार्षापणाः | १०० गावः। अशक्तौ १०० कार्षापणाः। |